**SET-4**

**Series #CDBA**

प्रश्न-पत्र कोड
Q.P. Code **52**

रोल नं.
Roll No.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **15** printed pages.
- Please check that this question paper contains **18** questions.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम्

# SANSKRIT

*अवधि : होरात्रयम्*
*निर्धारित समय : 3 घण्टे*
*Time allowed : 3 hours*

*पूर्णाङ्काः : 80*
*अधिकतम अंक : 80*
*Maximum Marks : 80*



Download from www.MsEducationTv.com

***General Instructions :***

*Question paper is divided into 4 sections.*

*It has total 18 questions.*

***Section A** – 1 Question no. 1 to 1*

***Section B** – 3 Questions no. 2 to 4*

***Section C** – 7 Questions no. 5 to 11*

***Section D** – 7 Questions no. 12 to 18*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

***सामान्य निर्देशाः***

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*अस्मिन् प्रश्नपत्रे अष्टादश **(18)** प्रश्नाः सन्ति ।*

***खण्डः 'क'** – 1 – प्रश्नसंख्या 1*

***खण्डः 'ख'** – 3 – प्रश्नसंख्या 2 – 4*

***खण्डः 'ग'** – 7 – प्रश्नसंख्या 5 – 11*

***खण्डः 'घ'** – 7 – प्रश्नसंख्या 12 – 18*

*विशिष्टनिर्देशानुसारं प्रश्नाः समाधेयाः ।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया ।*

**खण्डः 'क'** ***10 अङ्काः***

**अपठितावबोधनम्**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *10*

'संस्कृतभाषा सर्वभाषाणां जननी' इत्युच्यते । परम् अद्यत्वे छात्राणां मध्ये एकः चर्चितः प्रश्नः वर्तते यत् "संस्कृतपठनेन के लाभाः ?" अर्थात् संस्कृतपठनेन जीवनवृत्तेः अवसराः के ? वस्तुतः भौतिके युगे ईदृशी जिज्ञासा स्वाभाविकी एव । अस्याः जिज्ञासायाः समुचितं समाधानं सञ्चारमाध्यमेन कर्तुं शक्यते । वयम् पश्यामः यत् अद्यत्वे संस्कृतपठनेन नैके लाभाः सन्ति । संस्कृतभाषा विश्वस्य प्राचीनतमासु भाषासु अन्यतमा अस्ति । ऐतिहासिकदृष्ट्या संस्कृते लिखिताः ग्रन्थाः वेदाः महत्त्वपूर्णं स्थानं भजन्ते । आधुनिकसंस्कृतस्य वैज्ञानिकभाषारूपेण सर्वत्र महत्त्वपूर्णं स्थानं दृश्यते । यदा विश्वं कृत्रिममेधा विषये अनुसन्धानं करोति तत्र संस्कृतं महत् साहाय्यं कर्तुं शक्नोति । यतो हि संस्कृतस्य व्याकरणं पूर्णतया वैज्ञानिकम् अस्ति । वर्तमान समये संस्कृतस्य अध्येतारः शिक्षणकौशल-चिकित्सा-खगोल-विद्या-वास्तुविद्या-'आई.ए.एस.' प्रभृति । सर्वेषु क्षेत्रेषु स्वप्रतिभाप्रदर्शनं कुर्वन्ति । अस्माकं संस्कृतिः संस्कृताधारिता अपि । अत एव संस्कृतभाषायाः अध्ययनं जीवनमूल्यपरकम् जीवनवृत्तिसाधनपरम् च अस्ति, नात्र कोऽपि सन्देहः ।



Download from www.MsEducationTv.com

(अ) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) 2×1=2

(i) सर्वभाषाणां जननी का ?

(ii) अस्माकं संस्कृतिः का आधारिता वर्तते ?

(iii) कस्य व्याकरणं वैज्ञानिकम् ?

(आ) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) 2×2=4

(i) ऐतिहासिकदृष्ट्या के महत्त्वपूर्णं स्थानं भजन्ते ?

(ii) वर्तमानसमये शिक्षणकौशलादिषु सर्वेषु क्षेत्रेषु के स्वप्रतिभा-प्रदर्शनं कुर्वन्ति ?

(iii) संस्कृतभाषायाः अध्ययनं कीदृशम् अस्ति ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(ई) यथानिर्देशम् उत्तरत : (केवलं प्रश्नत्रयम्) 3×1=3

(i) 'पश्यामः' इति क्रिया पदस्य कर्तृपदं किम् ?

(A) नैके
(B) वयम्
(C) लाभाः
(D) संस्कृतपठनेन

(ii) 'समुचितम्' इति विशेषणपदस्य विशेष्यपदं किम् ?

(A) समाधानम्
(B) संस्कृतशिक्षकः
(C) स्वानुभवैः
(D) जिज्ञासायाः

(iii) 'हानयः' इति पदस्य किं विपर्ययपदं गद्यांशे प्रयुक्तम् ?

(A) सन्ति
(B) लिखिताः
(C) लाभाः
(D) नैके

(iv) 'अध्येतारः' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम् ?

(A) अस्ति
(B) सन्ति
(C) भजन्ते
(D) कुर्वन्ति



Download from www.MsEducationTv.com

## खण्डः 'ख'

**15 अङ्काः**

## रचनात्मकं कार्यम्

**2.** भवान् सौरवः । स्वमित्रं शाश्वतं प्रति स्वयात्रावृत्तान्तविषये लिखितं पत्रं मञ्जूषायाः पदैः पूरयित्वा पुनः लिखतु । $10\times\frac{1}{2}=5$

प्रयागराजतः

दिनाङ्कः ____________

प्रिय मित्र (i) ______________ !

सस्नेहं (ii) ___________

अत्र सर्वं कुशलं तत्रास्तु । गतमासे अहं (iii) ____________ शिमलां गतवान् । तत्र पर्वतानां (iv) ___________ दृष्ट्वा मम मनः अतीव (v) ___________ जातम् । तत्र (vi) ___________ पर्यावरणं वर्तते । शिमला (vii) ___________ राजधानी अस्ति । अतः तत्र सर्वत्र विकासः दृश्यते । देशात् विदेशेभ्यः च पर्यटकाः भ्रमणाय (viii) __________ आगच्छन्ति । अहमपि शिमलाभ्रमणं कृत्वा आत्मानं (ix) __________ मन्ये । भवान् अपि समयं प्राप्य एकवारं शिमलां गच्छेत् ।

भवदीयं प्रियं मित्रम्

(x) ____________ ।

**मञ्जूषा**

| |
|---|
| सौरवः, शिमलाम्, भ्रमणाय, प्रसन्नम्, धन्यम्, सौन्दर्यम्, शुद्धम्, हिमाचलप्रदेशस्य, नमोनमः, शाश्वत ! |



Download from www.MsEducationTv.com

**3.** प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत । *5×1=5*



**मञ्जूषा**

| |
|---|
| सुन्दराणि, अनेकानि, चित्राणि, ऐतिहासिकस्थानानि, भवनानि, नौका, नद्याम्, ताजमहलम्, पर्वताः, सन्ति, मन्दिरम्, रक्तदुर्गम् । |

**अथवा**

निम्नलिखितं विषयमधिकृत्य मञ्जूषाप्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत :

**'मम प्रियं पुस्तकम्'**

**मञ्जूषा**

| |
|---|
| मम, पठने, महती, ज्ञानस्य, साधनम्, भगवद्गीता, पुस्तकम्, प्रियम्, रुचिः, गीतायाम्, भण्डारः, कर्मयोगः, भक्तियोगः, अर्जुनम् प्रति, उपदेशः । |



Download from www.MsEducationTv.com

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत : (केवलं वाक्यपञ्चकम्) *5×1=5*

(i) मधुर मेरा मित्र है ।
Madhur is my friend.

(ii) अनेक लोग उद्यान में घूम रहे हैं ।
Many people are walking in the park.

(iii) हम सब घर जा रहे हैं ।
We all are going home.

(iv) रमा ने कल संस्कृत गीत गाया ।
Rama sang a Sanskrit song yesterday.

(v) विद्यालय में सौ शिक्षक हैं ।
There are hundred teachers in the school.

(vi) कल दस बजे परीक्षा होगी ।
The examination will be held tomorrow at 10 o'clock.

(vii) मैं हिन्दी भाषा जानता हूँ ।
I know Hindi language.

## खण्डः 'ग' *25 अङ्काः*

## अनुप्रयुक्तव्याकरणम्

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) <u>अभियुक्तः + च</u> अतीव कृषकायः ।

(ii) बसयानं विहाय <u>पदातिरेव</u> प्राचलत् ।

(iii) न <u>कः + अपि</u> त्रैलोक्ये मत्सदृशः ।

(iv) <u>धिङ् मामेवं</u> भूतम् ।

(v) सर्वथा <u>सम्यगुक्तम्</u> ।



Download from www.MsEducationTv.com

**6.** अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) किं वनराजपदाय सुपात्रं चीयते ?

(A) वनराजः पदाय

(B) वनराजा पदाय

(C) वनराजे पदाय

(D) वनराजस्य पदाय

(ii) दीने पुत्रे माता कृपया आर्द्रं हृदयं यस्याः सा भवेत् ।

(A) कृपार्द्रहृदया

(B) कृपयार्द्रहृदया

(C) कृपहृदयार्द्रा

(D) कृपाद्राहृदया

(iii) कुशलवौ सभां प्रविशतः ।

(A) लवः कुशाः च

(B) कुशः लवौ च

(C) कुशः च लवः च

(D) कुशौ च लवौ च

(iv) प्रजासुखे सुखं राज्ञः ।

(A) प्रजा सुखे च

(B) प्रजानां सुखे

(C) प्रजाः सुखं च

(D) प्रजायाः सुखं च

(v) सव्यवधानं न चारित्रलोपाय ।

(A) व्यवधानं सह

(B) व्यवधानेन सहितम्

(C) व्यवधानाय सहितम्

(D) व्यवधानस्य सहितम्



Download from www.MsEducationTv.com

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) 'विद्वान्' एव चक्षुष्मान् प्रकीर्तितः ।
- (A) चक्षुष् + टाप्
- (B) चक्षुष् + मतुप्
- (C) चक्षुष् + ङीप्
- (D) चक्षुष् + वतुप्

(ii) मम नृत्यं प्रकृतेः आराधन + टाप् ।
- (A) आराधनम्
- (B) आराधनः
- (C) आराधना
- (D) आराधनता

(iii) चित्ते 'अवक्रता' भवेत् ।
- (A) अवक्र + टाप्
- (B) अवक्र + ङीप्
- (C) अवक्र + त्व
- (D) अवक्र + तल्

(iv) इयं काचित् व्याघ्रमारी इति ।
- (A) व्याघ्रमार + टाप्
- (B) व्याघ्रमार + ङीप्
- (C) व्याघ्रमार + मतुप्
- (D) व्याघ्रमार + ई

(v) वेदानां महत् + त्व को न जानाति ?
- (A) महत्त्वम्
- (B) महत्ता
- (C) महत्वम्
- (D) महात्वम्



Download from www.MsEducationTv.com

**8.** वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा संवादं पुनः लिखत : (केवलं प्रश्नत्रयम्) *3×1=3*

(i) *शिवा* – रमे ! अद्य विलम्बेन कथम् ?
*रमा* – शिवे ! अद्य ________ उत्सवं द्रष्टुं गच्छामि ।

(A) मम
(B) माम्
(C) मया
(D) अहम्

(ii) *शिवा* – किं तत्र तव सखी अपि गच्छति ?
*रमा* – नहि, तत्र ________ एव गम्यते ।

(A) अहम्
(B) सख्या
(C) वयम्
(D) मया

(iii) *शिवा* – साधु ! किं तत्र जनाः अपि उत्सवं पश्यन्ति ?
*रमा* – आम्, तत्र जनैः अपि ________ दृश्यते ।

(A) उत्सवः
(B) उत्सवम्
(C) उत्सवान्
(D) उत्सवौ

(iv) *शिवा* – रमे ! अद्य विद्यालये सङ्गीत-प्रतियोगिता भवति ।
*रमा* – शोभनम् । तत्र मया अपि गीतं __________ ।

(A) गायामि
(B) गायति
(C) गीयते
(D) गीयन्ते



Download from www.MsEducationTv.com

**9.** कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत : (केवलं प्रश्नचतुष्टयम्) : *4×1=4*

(i) चरितार्थः प्रातः 7:00 वादने उद्यानं गच्छति ।

(ii) 8:00 वादने सः गृहं प्रत्यागच्छति ।

(iii) तस्य प्रथमा कक्ष्या 9:30 वादने भवति ।

(iv) 12:45 वादने सः अध्ययनकार्यात् मुक्तो भवति ।

(v) सः 2:15 वादने क्रीडितुं क्रीडाक्षेत्रं गच्छति ।

**10.** मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत : (केवलं प्रश्नत्रयम्) *3×1=3*

(i) गङ्गा हिमालयात् प्रभवति, यमुना __________ प्रभवति ?

(ii) विद्यालये __________ कार्यक्रमः भविष्यति ।

(iii) __________ वृष्टिः प्रारभत ।

(iv) धनस्य __________ प्रयोगं मा कुर्युः ।

**मञ्जूषा**

| सहसा, वृथा, श्वः, कुतः |
|---|

**11.** अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत : (केवलं प्रश्नत्रयम्) *3×1=3*

(i) क्रीडाक्षेत्रे छात्राः पठथः ।

(A) पठसि

(B) पठथ

(C) पठामः

(D) पठन्ति

(ii) ह्यः विद्यालयस्य वार्षिकोत्सवः भविष्यति ।

(A) भवति

(B) भवतु

(C) अभवत्

(D) भवेत्



Download from www.MsEducationTv.com

(iii) बलीवर्द: शरीरेण दुर्बलम् आसीत् ।

(A) दुर्बल:

(B) दुर्बला

(C) दुर्बलस्य

(D) दुर्बलात्

(iv) महावृक्षा: सेवितव्य: ।

(A) महावृक्षे

(B) महावृक्ष:

(C) महावृक्षस्य

(D) महावृक्षम्

## खण्डः 'घ' *30*

## पठितावबोधनम्

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *5*

आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकाय: । भारवत: शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत् । स भारवेदनया क्रन्दति स्म । तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच — "रे दुष्ट ! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारित: । इदानीं निजकृत्यस्य फलं भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चै: अहसत् । यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ । न्यायाधीशेन पुनस्तौ घटनाया: विषये वक्तुमादिष्टौ । आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यम् अघटत् स शव: प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् — मान्यवर ! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि 'त्वयाऽहं चोरिताया: मञ्जूषाया: ग्रहणाद् वारित:, अत: निजकृत्यस्य फलं भुङ्क्ष्व ।'

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) सुपुष्टदेह: क: आसीत् ?

(ख) अभियुक्ताय भारवत: कस्य वहनं दुष्करम् आसीत् ?

(ग) कृशकाय: क: आसीत् ?



Download from www.MsEducationTv.com

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) आरक्षी अभियुक्तं प्रति दण्डविषये किम् प्रोच्य उच्चैः अहसत् ?

(ख) अभियुक्तः कया क्रन्दति स्म ?

(ग) उभौ शवम् आनीय कुत्र स्थापितवन्तौ ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे अत्र वाक्ये कर्तृपदं किम् ?

(ख) 'चोरितायाः' इति विशेषणपदस्य विशेष्यपदं किम् ?

(ग) 'प्रणम्य' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

**13.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत : 5

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ।।

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) पिता कदा विद्याधनं यच्छति ?

(ख) पिता कस्मै विद्याधनं यच्छति ?

(ग) कः तपः तेपे ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) का उक्तिः कृतज्ञता ?

(ख) पिता पुत्राय कीदृशं विद्याधनं यच्छति ?

(ग) पिता पुत्राय बाल्ये कीदृशं धनं यच्छति ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'सुताय' इति पदस्य पर्यायपदं किम् ?

(ख) 'महत्' इति पदस्य विशेष्यपदं किम् ?

(ग) 'यच्छति' इति पदस्य कर्तृपदं किम् ?



Download from www.MsEducationTv.com

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत : *5*

*रामः* – अहो ! उदात्तरम्यः समुदाचारः । किं नामधेयो भवतोर्गुरुः ?

*लवः* – ननु भगवान् वाल्मीकिः ।

*रामः* – केन सम्बन्धेन ?

*लवः* – उपनयनोपदेशेन ।

*रामः* – अहमत्रभवतोः जनकं नामतो वेदितुमिच्छामि ।

*लवः* – न हि जानाम्यस्य नामधेयम् । न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति ।

*रामः* – अहो माहात्म्यम् ।

*कुशः* – जानाम्यहं तस्य नामधेयम् ।

*रामः* – कथ्यताम् ।

*कुशः* – निरनुक्रोशो नाम ।

*रामः* – वयस्य, अपूर्वं खलु नामधेयम् ।

*विदूषकः* – (विचिन्त्य) एवं तावत् पृच्छामि । निरनुक्रोश इति क एवं भणति ?

*कुशः* – अम्बा ।

(i) एकपदेन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) लवस्य गुरोः नाम किम् ?

(ख) लवकुशयोः गुरोः नाम कः पृच्छति ?

(ग) लवस्य पितुः नाम कः जानाति ?

(ii) पूर्णवाक्येन उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) वाल्मीकिः केन सम्बन्धेन लवकुशयोः गुरुः अस्ति ?

(ख) कुशः स्वपितुः नाम किम् ज्ञापयति ?

(ग) कः लवकुशयोः जनकस्य नाम वेदितुम् इच्छति ?

(iii) निर्देशानुसारम् उत्तरत : (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'वाल्मीकिः' इति पदस्य विशेषणपदं किम् ?

(ख) 'जानामि' इति पदस्य कर्तृपदं किम् ?

(ग) 'माता' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?



Download from www.MsEducationTv.com

**15.** अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत : (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) यः आत्मनः <u>श्रेयः</u> इच्छति ।

(ii) <u>सुरभिः</u> पुत्रस्य दैन्यं दृष्ट्वा रोदिति ।

(iii) त्वं <u>मानुषात्</u> बिभेषि ।

(iv) काकः <u>कृष्णः</u> भवति ।

(v) <u>हरिततरूणां</u> माला रमणीया ।

**16.** मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत : *4×1=4*

'प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः ।
पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा ।।
मानवाय जीवनं कामये नो जीवन्मरणम् । शुचि ।।

**अन्वयः –**

(i) _________ प्रस्तरतले पिष्टाः नो (ii) _________ । निसर्गे (iii) _________ सभ्यता समाविष्टा न (iv) _________ । मानवाय जीवनं कामये नो जीवन्मरणम् ।

**मञ्जूषा**

| पाषाणी, स्यात्, लतातरूगुल्माः, भवन्तु |
|---|

**अथवा**

अधोलिखितश्लोकस्य भावार्थे रिक्तस्थानानि मञ्जूषायाः साहाय्येन पूरयित्वा पुनः लिखत :

एक एव खगो मानी वने वसति चातकः ।
पिपासितो वा म्रियते याचते वा पुरन्दरम् ।।

**भावार्थः –**

वने केवलम् (i) _________ एव (ii) _________ स्वाभिमानी पक्षी वसति । सः (iii) _________ वा म्रियते अथवा केवलं जलं (iv) _________ याचते अर्थात् सः सर्वं न याचते ।

**मञ्जूषा**

| चातकः, एकः, पिपासितः, इन्द्रदेवम् |
|---|



Download from www.MsEducationTv.com

**17.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत : $8 \times \frac{1}{2} = 4$

(i) निर्धनस्य पुत्रः छात्रावासे निवसन् अध्ययने संलग्नो जातः ।

(ii) तेन वित्तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं कारितवान् ।

(iii) कश्चन निर्धनः जनः परिश्रमेण किञ्चित् धनम् अर्जितवान् ।

(iv) पुत्रस्य रुग्णतां श्रुत्वा पिता व्याकुलो जातः ।

(v) पुत्रः छात्रावासे रुग्णः जातः ।

(vi) सायङ्कालो जातः परं गन्तव्यात् सः पुत्रः दूरे आसीत् ।

(vii) निर्धनः स्वपुत्रं द्रष्टुं पदातिः एव प्राचलत् ।

(viii) सः पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कमपि गृहम् उपागतः ।

**18.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत : (केवलं प्रश्नत्रयम्) $3 \times 1 = 3$

(i) कश्चन निर्धनः <u>वित्तम्</u> उपार्जितवान् ।

(A) वायुम् (B) फलम्

(C) धनम् (D) अन्नम्

(ii) <u>अपरः</u> वानरः सिंहस्य पुच्छं धुनाति ।

(A) अनेकाः (B) अन्यः

(C) प्रथमः (D) एकः

(iii) रसालमुकुलानि <u>भृङ्गाः</u> समाश्रयन्ते ।

(A) हयाः (B) नागाः

(C) गजाः (D) भ्रमराः

(iv) <u>वासव</u> ! अहं पुत्रस्य दैन्यं दृष्ट्वा रोदिमि ।

(A) पुत्र ! (B) इन्द्र !

(C) गणेश ! (D) शिव !



Download from www.MsEducationTv.com